Vedavyas

Samantranavratra paddhati; soddhara katha sahitya

समंत्र नवरात्र पद्धतिः सोद्धारा कथा सहिता

Sanskrit

Paper – Printed

1955 sambat (120 years old)

22 Folio

10.4" x 4.6"

Complete

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ अथ समंत्रनवरात्रपद्धतिः सोद्धारा कथासहिता प्रार० ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

स्तोत्रपाठग्रन्थाः ।

शाक्तप्रमोददशमहाविद्या और पांच देवतोंका
पञ्चाङ्ग द्वादशांग सहित इसमें १८४ विषयहैं
शाक्तलोगोंको अवश्य लेना चाहिये ... ... ५—०

श्रीरामरक्षास्तोत्र—श्रीराममहिमस्तोत्र—
विष्णुपञ्जरस्तोत्र—श्रीवेङ्कटेशाष्टकस्तो-
त्रेति स्तोत्रचतुष्टयम्... ... . ०—३

दुर्गासप्तशती शान्तनवीटीकासहित ... ... १—४

दुर्गासप्तशती भट्टनागोजीकृतटीकासहित ... १—०

दुर्गासप्तशती भाषाटीका शान्तनवी टीकाके-
अनुकूल ... ... १—०

दुर्गासप्तशती मोटे अक्षरकी टाईप खुली-
पंक्ति ६ की ... ... १—०

दुर्गासप्तशती ७ पंक्तिवाली बडा अक्षर
खुला पत्रा ... ... ०—१२

दुर्गासप्तशती ७ पंक्तिकी बंधेली ... ... १—०

दुर्गासप्तशती १० पंक्तिवाली मध्याम अक्षर टाईप
खुला पत्रा .... ०—८

दुर्गासप्तशती १० पंक्तिवाली बंधेली रेशमी ... ०—१२

दुर्गासप्तशती ३२ पेजी गुटका ... ... ०—१०

तथा खुला पत्रा टाईपका ... ... ०—८

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भूमिका।

श्रीगुरुभ्यो नमः॥ अथेह खलु श्रीमन्महाराजाधिराजसवाईजयपुरनरेशश्री १०८ श्रीसवाईरामसिंहनिर्मितप्रासादांतरमंदिरविराजमानश्रीराजराजेश्वरीचरणसेवकगौडद्विजचतुर्वेदिनाथूनारायणाभिधानोहमखिलभारतवर्षविद्वज्जनप्रमोदाय शक्तिसंगमतंत्रतृतीयखंडतः समुद्धृत्य ज्योतिर्धर्मशास्त्रादिषु परमोपकारकारिणीं भारतवर्षदेशव्यवस्थां प्रकाशयामि॥

अथेह खलु विविधविद्वज्जनविरचितनवरात्रविधानेषु परमोत्तमो महर्षिवेदव्यासविरचितो नवरात्रविधानक्रमः श्रीदेवीभागवते तृतीयस्कंधे षड्विंशे २६ऽध्यायेऽस्ति तमनुसृत्य सकलदुर्गाभक्तद्विजाल्हादविवृद्धये दुर्गानवरात्रपद्धतिं करोमि तत्रादौ—वेदव्यासोक्तनवरात्रविधानक्रमः॥ १॥ ततो नवरात्रकथा॥२॥ तदनंतरं दुर्गानवरात्रपद्धतिः॥ ३॥ बलिदानप्रयोगश्च॥ ४॥॥ ॐ॥ इति॥ ॥ ॥

इसका सर्व प्रकारका हक्क सन १८६७ के आक्ट २५ के बमूजब यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ श्रीदुर्गायै नमः ॥ अथ देवीभागवते तृतीयस्कंधे षड्विंशेऽध्याये (२६) नवरात्रार्चनाविधिः ॥

जनमेजय उवाच ॥ नवरात्रे तु संप्राप्ते किं कर्तव्यं द्विजोत्तम ॥ विधानं विधिवद्ब्रूहि शरत्काले विशेषतः॥ १॥ किं फलं खलु कस्तत्र विधिः कार्यो महामते ॥ एतद्विस्तरतो ब्रूहि कृपया द्विजसत्तम ॥ २ ॥ व्यास उवाच ॥ शृणु राजन्प्रवक्ष्यामि नवरात्रव्रतं शुभम् ॥ शरत्काले विशेषेण कर्तव्यं विधिपूर्वकम् ॥ ३ ॥ वसन्ते च प्रकर्तव्यं तथैव प्रेमपूर्वकम् ॥ द्वावृतू यमदंष्ट्राख्यौ नूनं सर्वजनेषु वै ॥ ४ ॥ शरद्वसन्तनामानौ दुर्गमौ प्राणिनामिह ॥ तस्माद्यत्नादिदं कार्यं सर्वत्र शुभमिच्छता ॥ ५ ॥ द्वावेव सुमहाघोरावृतू रोगकरौ नृणाम् ॥ वसंतशरदावेव जननाशकरावुभौ ॥ ६ ॥ तस्मात्तत्र प्रकर्तव्यं चंडिकापूजनं बुधैः ॥ चैत्रेऽश्विने शुभे मासे भक्तिपूर्वं नराधिप ॥ ७ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अमावास्यां च संप्राप्य संभारं कल्पयेच्छुभम् ॥ हविष्यं चाशनं कार्यमेकभुक्तं तु तद्दिने ॥८॥ मंडपस्तु प्रकर्तव्यः समे देशे शुभे स्थले ॥ हस्तषोडशमानेन स्तंभध्वजसमन्वितः ॥ ९ ॥ गौरमृद्गोमयाभ्यां च लेपनं कारयेत्ततः ॥ तन्मध्ये वेदिका शुभ्रा कर्तव्या च समा स्थिरा ॥ १० ॥ चतुर्हस्ता च हस्तोच्छ्रा पीठार्थं स्थानमुत्तमम् ॥ तोरणानि विचित्राणि वितानं च प्रकल्पयेत् ॥ ११ ॥ रात्रौ द्विजानथामंत्र्य देवीतत्त्वविशारदान् ॥ आचारनिरतान्दान्तान्वेदवेदांगपारगान् ॥ १२ ॥ प्रतिपद्दिवसे कार्यं प्रातः स्नानं विधानतः ॥ नद्यां नदे तडागे वा वाप्यां कूपे गृहेऽथवा ॥ १३ ॥ प्रातर्नित्यं पुरः कृत्वा द्विजानां वरणं ततः ॥ अर्घ्यपाद्यादिकं सर्वं कर्तव्यं मधुपूर्वकम् ॥ १४ ॥ वस्त्रालंकरणादीनि देयानि च स्वशक्तितः ॥ वित्तशाठ्यं न कर्तव्यं विभवे सति कर्हिचित् ॥ १५ ॥ विप्रैः सन्तोषितैः कार्यं सम्पूर्णं सर्वथा भवेत् ॥ नव पंच

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

त्रयश्चैको देव्याः पाठे द्विजाः स्मृताः ॥ १६ ॥ वरयेद्ब्राह्मणं शान्तं पारायणकृते तदा॥
स्वस्तिवाचनकं कार्यं वेदमंत्रविधानतः ॥ १७ ॥ वेद्यां सिंहासनं स्थाप्य क्षौमवस्त्र-
समन्वितम् ॥ तत्र स्थाप्यांबिका देवी चतुर्हस्ताऽयुधान्विता ॥ १८ ॥ रत्न-
भूषणसंयुक्ता मुक्ताहारविराजिता ॥ दिव्यांबरधरा सौम्या सर्वलक्षण-
संयुता ॥ १९ ॥ शंखचक्रगदापद्मधरा सिंहे स्थिता शिवा ॥ अष्टादशभुजा वाऽपि
प्रतिष्ठाप्या सनातनी ॥२०॥ अर्चाऽभावे तथा यंत्रं नवार्णमंत्रसंयुतम् ॥ स्थापयेत्पी-
ठपूजार्थं कलशं तत्र पार्श्वतः ॥ २१ ॥ पंचपल्लवसंयुक्तं वेदमंत्रैः सुसंस्कृतम्॥ सुतीर्थ-
जलसम्पूर्णं हेमरत्नैः समन्वितम् ॥ २२ ॥ पार्श्वे पूजार्थसंभारान्परिकल्प्य समंततः॥
गीतवादित्रनिर्घोषान्कारयेन्मंगलाय वै ॥२३॥ तिथौ हस्तान्वितायां च नंदायां
पूजनं वरम् ॥ प्रथमे दिवसे राजन्विधिवत्कामदं नृणाम् ॥ २४ ॥ नियमं प्रथमं कृत्वा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

 पश्चात्पूजां समाचरेत् ॥ उपवासेन नक्तेन चैकभुक्तेन वा पुनः ॥ २५ ॥ करिष्यामि व्रतं मातर्नवरात्रमनुत्तमम् ॥ साहाय्यं कुरु मे देवि जगदंब ममाखिलम् ॥२६॥ यथाशक्ति प्रकर्तव्यो नियमो व्रतहेतवे॥पश्चात्पूजा प्रकर्त्तव्या विधिवन्मंत्रपूर्वकम् ॥२७॥ चंदनागरुकर्पूरैः कुसुमैश्च सुगंधिभिः ॥ मंदारकरजाशोकचंपकैः करवीरकैः ॥ २८ ॥ मालतीब्रह्मकापुष्पैस्तथा बिल्वदलैः शुभैः ॥ पूजयेज्जगतां धात्रीं धूपैर्दीपैर्विधानतः ॥ २९ ॥ फलैर्नानाविधैरर्घ्यं प्रदातव्यं च तत्र वै ॥ नारिकेलैर्मातुलुंगैर्दाडिमीकदलीफलैः ॥ ३० ॥ नारंगैः पनसैश्चैव तथा पूर्णफलैः शुभैः ॥ अन्नदानं प्रकर्तव्यं भक्तिपूर्वं नराधिप ॥ ३१ ॥ मांसाशनं ये कुर्वंति तैः कार्यं पशुहिंसनम् ॥ महिषाजवराहाणां बलिदानं विशिष्यते ॥ ३२ ॥ देव्यग्रे निहता यांति पशवः स्वर्गमव्ययम् ॥ न हिंसा पशुजा तत्र निघ्नतां तत्कृतेऽनघ ॥३३॥ अहिंसा याज्ञिकी प्रोक्ता सर्वशास्त्रविनिर्णये ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

देवतार्थे विसृष्टानां पशूनां स्वर्गतिर्ध्रुवा ॥३४॥ होमार्थं चैव कर्तव्यं कुंडं चैव त्रिकोण-
कम् ॥ स्थंडिलं वा प्रकर्तव्यं त्रिकोणं मानतः शुभम् ॥ ३५ ॥ त्रिकालं पूजनं नित्यं
नानाद्रव्यैर्मनोहरैः ॥ गीतवादित्रनृत्यैश्च कर्तव्यश्च महोत्सवः ॥ ३६ ॥ नित्यं भूमौ
च शयनं कुमारीणां च पूजनम् ॥ वस्त्रालंकरणैर्दिव्यैर्भोजनैश्च सुधामयैः ॥३७॥ एकैकां
पूजयेन्नित्यमेकवृद्ध्या तथा पुनः ॥ द्विगुणं त्रिगुणं वाऽपि प्रत्येकं नवकं च वा ॥३८॥
विभवस्यानुसारेण कर्तव्यं पूजनं किल ॥ वित्तशाठ्यं न कर्तव्यं राजञ्छक्तिमखे सदा ॥
॥ ३९ ॥ एकवर्षा न कर्तव्या कन्या पूजाविधौ नृप ॥ परमज्ञा तु भोगानां गंधादीनां
च बालिका ॥४०॥ कुमारिका तु सा प्रोक्ता द्विवर्षा या भवेदिह ॥ त्रिमूर्तिश्च त्रिवर्षा च
कल्याणी चतुरब्दिका ॥४१॥ रोहिणी पंचवर्षा च षड्वर्षा कालिका स्मृता ॥ चंडिका

१ बिल्वफलैः ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

सप्तवर्षा स्यादष्टवर्षा च शांभवी ॥ ४२ ॥ नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी ॥
अत ऊर्ध्वं न कर्तव्या सर्वकार्यविगर्हिता ॥ ४३ ॥ एभिश्च नामभिः पूजा कर्तव्या
विधिसंयुता ॥ तासां फलानि वक्ष्यामि नवानां पूजने सदा ॥ ४४ ॥ कुमारी पूजिता
कुर्याद्दुःखदारिद्र्यनाशनम् ॥ शत्रुक्षयं धनायुष्यं बलवृद्धिं करोति वै ॥ ४५ ॥ त्रिमू-
र्तिपूजनादायुस्त्रिवर्गस्य फलं भवेत् ॥ धनधान्यागमश्चैव पुत्रपौत्रादिवृद्धयः ॥ ४६ ॥
विद्यार्थी विजयार्थी च राज्यार्थी यश्च पार्थिवः ॥ सुखार्थी पूजयेन्नूनं कल्याणीं सर्व-
कामदाम् ॥ ४७ ॥ कालिकां शत्रुनाशार्थं पूजयेद्भक्तिपूर्वकम् ॥ ऐश्वर्यधनकामश्च चं-
डिकां परिपूजयेत् ॥ ४८ ॥ पूजयेच्छांभवीं नित्यं नृपसम्मोहनाय च ॥ दुःखदा-
रिद्र्यनाशाय संग्रामे विजयाय च ॥ ४९ ॥ क्रूरशत्रुविनाशार्थं तथोग्रकर्मसाधने ॥
दुर्गां च पूजयेद्भक्त्या परलोकसुखाय च ॥ ५० ॥ वांछितार्थस्य सिद्ध्यर्थं सुभद्रां

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पूजयेत्सदा ॥ रोहिणीं रोगनाशाय पूजयेद्विधिवन्नरः ॥ ५१ ॥ श्रीरस्त्विति च मंत्रेण
पूजयेद्भक्तितत्परः ॥श्रीयुक्तमंत्रैरथवा बीजमंत्रैरथापि वा॥५२॥कुमारस्य च तत्त्वानि
या सृजत्यपि लीलया ॥ कादीनपि च देवांस्तान् कुमारीं पूजयाम्यहम् ॥५३॥सत्वा-
दिभिस्त्रिमूर्तिर्या तैर्हि नानास्वरूपिणी ॥ त्रिकालव्यापिनी शक्तिस्त्रिमूर्तिं पूजया-
म्यहम् ॥५४॥ कल्याणकारिणी नित्यं भक्तानां पूजिताऽनिशम् ॥ पूजयामि च तां
भक्त्या कल्याणीं सर्वकामदाम्॥५५॥रोहयंती च बीजानि प्राग्जन्मसंचितानि वै ॥
या देवी सर्वभूतानां रोहिणीं पूजयाम्यहम्॥५६॥काली कालयते सर्वं ब्रह्मांडं सचरा-
चरम्॥कल्पान्तसमये या तां कालिकां पूजयाम्यहम्॥ ५७॥ चंडिकां चंडरूपां च
चंडमुंडविनाशिनीम् ॥ तां चंडपापहारिणीं चंडिकां पूजयाम्यहम् ॥५८॥ अकारणा-
त्समुत्पत्तिर्यन्मयैः परिकीर्तिता॥यस्यास्तां सुखदां देवीं शांभवीं पूजयाम्यहम्॥५९॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

दुर्गा त्रायति भक्तं या सदा दुर्गार्तिनाशिनी ॥ दुर्ज्ञेया सर्वदेवानां तां दुर्गां पूजयाम्य-
हम् ॥ ६० ॥ सुभद्राणि च भक्तानां कुरुते पूजिता सदा ॥ अभद्रनाशिनीं देवीं सुभद्रां
पूजयाम्यहम् ॥ ६१ ॥ एभिर्मंत्रैः पूजनीयाः कन्यकाः सर्वदा बुधैः ॥ वस्त्रालंकरणैर्मा-
ल्यैर्गंधैरुच्चावचैरपि ॥ ६२ ॥ इति श्रीदेवीभागवते महापुराणे तृतीयस्कंधे षड्विं-
शोऽध्यायः ॥ २६ ॥ व्यास उवाच ॥ हीनांगीं वर्जयेत्कन्यां कुष्ठयुक्तां व्रणांकिताम् ॥
गंधस्फुरितहीनांगीं विशालकुलसंभवाम्[1] ॥ १ ॥ जात्यंधां केकरां काणीं कुरूपां
बहुरोमशाम्[2] ॥ संत्यजेद्रोगिणीं कन्यां रक्तपुष्पादिनांकिताम् ॥ २ ॥ क्षामां गर्भस-
मुद्भूतां गोलकां[3] कन्यकोद्भवाम् ॥ वर्जनीयाः सदा चैताः सर्वपूजादिकर्मसु ॥ ३ ॥
अरोगिणीं सुरूपांगीं सुंदरीं व्रणवर्जिताम् ॥ एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूज-

---

१ दुष्टकुलसंभवाम् । २ कृशाम् । ३ विधवाजन्याम् ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

येत् ॥ ४ ॥ ब्राह्मणी सर्वकार्येषु जयार्थे नृपवंशजा ॥ लाभार्थे वैश्यवंशोत्था मता वा
शूद्रवंशजा ॥ ५ ॥ ब्राह्मणैर्ब्रह्मजाः पूज्या राजन्यैर्ब्रह्मवंशजाः ॥ वैश्यैस्त्रिवर्गजाः
पूज्याश्चतस्रः पादसंभवैः ॥ ६ ॥ कारुभिश्चैव वंशोत्था यथायोग्यं प्रपूजयेत् ॥ नवरा-
त्रविधानेन भक्तिपूर्वं सदैव हि ॥ ७॥ अशक्तो नियतं पूजां कर्तुं चेन्नवरात्रके ॥ अष्ट-
म्यां च विशेषेण कर्तव्यं पूजनं सदा॥ ८ ॥पुराऽष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी॥
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह॥ ९॥ अतोऽष्टम्यां विशेषेण कर्तव्यं
पूजनं सदा ॥ नानाविधोपहारैश्च गंधमाल्यानुलेपनैः॥ १०॥ पायसैरामिषैर्होमैर्ब्राह्म-
णानां च भोजनैः ॥ फलपुष्पोपहारैश्च तोषयेज्जगदम्बिकाम् ॥ ११ ॥ उपवासे ह्यश-
क्तानां नवरात्रव्रते पुनः ॥ उपोषणत्रयं प्रोक्तं यत्रोक्तं फलदं नृप॥ १२॥ सप्तम्यां च
तथाऽष्टम्यां नवम्यां भक्तिभावतः ॥ त्रिरात्रकरणात्सर्वं फलं भवति पूजनात् ॥ १३ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

 पूजाभिश्चैव होमैश्च कुमारीपूजनैस्तथा ॥ संपूर्णं तद्व्रतं प्रोक्तं विप्राणां चैव भोजनैः
॥ १४ ॥ व्रतानि यानि चान्यानि दानानि विविधानि च ॥ नवरात्रव्रतस्यास्य नैव तु-

ल्यानि भूतये ॥ १५ ॥ धनधान्यप्रदं नित्यं सुखसंतानवृद्धिदम् ॥ आयुरारोग्यदं चैव
स्वर्गदं मोक्षदं तथा ॥ १६ ॥ विद्यार्थी वा धनार्थी वा पुत्रार्थी वा भवेन्नरः ॥ तेनेदं विधिव-
त्कार्यं व्रतं सौभाग्यसिद्धिदम् ॥ १७ ॥ विद्यार्थी सर्वविद्यां वै प्राप्नोति व्रतसाधनात् ॥
राज्यभ्रष्टो नृपो राज्यं समवाप्नोति सर्वथा ॥ १८ ॥ पूर्वजन्मनि यैर्नूनं न कृतं
व्रतमुत्तमम् ॥ ते व्याधिनो दरिद्राश्च भवंति पुत्रवर्जिताः ॥ १९ ॥ वंध्या च या
भवेन्नारी विधवा धनवर्जिता ॥ अनुमा तत्र कर्तव्या नेयं कृतवती व्रतम् ॥ २० ॥
नवरात्रव्रतं प्रोक्तं न कृतं येन भूतले ॥ स कथं विभवं प्राप्य मोदते च तथा दिवि ॥
॥ २१ ॥ रक्तचंदनसंमिश्रैः कोमलैर्बिल्वपत्रकैः ॥ भवानी पूजिता येन स भवेन्नृपतिः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

क्षितौ ॥ २२ ॥ नाराधिता येन शिवा सनातनी दुःखार्तिहा सिद्धिकरी जगद्धरा ॥
दुःखावृतः शत्रुयुतश्च भूतले नूनं दरिद्रो भवतीह मानवः ॥ २३ ॥ यां विष्णुरिंद्रो
हरपद्मजौ तथा वह्निः कुबेरो वरुणो दिवाकरः ॥ ध्यायंति सर्वार्थसमाप्तिनंदितास्तां
किं मनुष्या न भजंति चंडिकाम् ॥ २४ ॥ स्वाहास्वधानाममनुप्रभावैस्तृप्यंति
देवाः पितरस्तथैव ॥ यज्ञेषु सर्वेषु मुदाऽहरंति यन्नामयुग्मं श्रुतिभिर्मुनींद्राः ॥
॥ २५ ॥ यस्येच्छया सृजति विश्वमिदं प्रजेशो नानाऽवतारकलनं कुरुते हरिश्च ॥
नूनं करोति जगतः किल भस्म शम्भुस्तां शर्मदां न भजते नु कथं मनुष्यः ॥ २६ ॥
नैकोऽस्ति सर्वभुवनेषु तया विहीनो देवो नरोऽथ विहगः किल पन्नगो वा ॥ गंधर्व-
राक्षसपिशाचनगेषु नूनं यः स्पंदितुं भवति शक्तियुतो यथेच्छम् ॥ २७ ॥ तां न सेवेत
कश्चंडीं सर्वकामार्थदां शिवाम् ॥ व्रतं तस्या न कः कुर्याद्वांछन्नर्थचतुष्टयम् ॥ २८ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

महापातकसंयुक्तो नवरात्रव्रतं चरेत् ॥ मुच्यते सर्वपापेभ्यो नात्र कार्या विचारणा
॥२९॥ अथ कथा॥पुरा कश्चिद्वणिक् [1]दीनो धनहीनः सुदुःखितः॥कुटुंबी चाभवत्क-
श्चित्कोसले नृपसत्तम ॥ ३० ॥ अपत्यानि बहून्यस्याभवन्क्षुत्पीडितानि च ॥ भक्ष्यं
किंचित्तु सायाह्ने प्रापुस्तस्य च बालकाः॥३१॥भुंक्ते स्म कार्यकर्ताऽसौ परस्याथ बुभु-
क्षितः॥कुटुंबभरणं तत्र चकारातिनिराकुलः ॥३२॥ सदा धर्मरतः शांतः सदाचारश्च
सत्यवाक् ॥ अक्रोधनश्च धृतिमान्निर्मदश्चानसूयकः ॥ ३३ ॥ संपूज्य देवता नित्यं
पितॄनप्यतिथींस्तथा ॥ भुंजाने पोष्यवर्गेऽथ कृतवान्भोजनं वणिक् ॥३४॥ एवं ग-
च्छति काले वै सुशीलो नामतो गुणैः ॥ दारिद्र्यार्तो द्विजं शांतं पप्रच्छातिबुभुक्षितः
॥३५॥ सुशील उवाच ॥ भो भूदेव कृपां कृत्वा वदस्वाद्य महामते ॥ कथं दारिद्र्य-

[1] दुःखी ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नाशः स्यादिति मे निश्चयेन वै ॥ ३६ ॥ धनेषणा मे नैवास्ति धनी स्यामिति मानद ॥
कुटुंबभरणार्थं वै पृच्छामि त्वां द्विजोत्तम ॥ ३७ ॥ पुत्री सुतस्तु मे बालो भक्षार्थी
रोदते भृशम् ॥ तावन्मात्रं गृहे नान्नं मुष्टिमेकां ददाम्यहम् ॥ ३८ ॥ विसर्जितो यतो गे-
हाद्गतो बालो रुदन्मया ॥ अतो मे दह्यतेऽत्यर्थं किं करोमि धनं विना ॥ ३९ ॥ विवाहोऽ-
स्ति सुताया मे नास्ति वित्तं करोमि किम् ॥ दशवर्षाधिकायास्तु दानकालोऽपि
यात्यलम् ॥ ४० ॥ तेन शोचामि विप्रेंद्र सर्वज्ञोऽसि दयानिधे ॥ तपो दानं व्रतं किंचिद्ब्रूहि
मंत्रजपं तथा ॥ ४१ ॥ येनाहं पोष्यवर्गस्य करोमि द्विज पोषणम् ॥ तावन्मे स्याद्धन-
प्राप्तिर्नाधिकं प्रार्थये किल ॥ ४२ ॥ त्वत्प्रसादात्कुटुंबं मे सुखितं प्रभवेदिह ॥ तत्कुरु-
ष्व महाभाग ज्ञानेन परिचिंत्य च ॥ ४३ ॥ व्यास उवाच ॥ इति पृष्टस्तथा तेन ब्राह्मणः
संशितव्रतः ॥ उवाच परमप्रीतस्तं वैश्यं नृपसत्तम ॥ ४४ ॥ वैश्यवर्य कुरुष्वाद्य नवरात्र-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

व्रतं शुभम् ॥ पूजनं भगवत्याश्च हवनं भोजनं तथा ॥४५॥वेदपारायणं शक्तिजपहो-
मादिकं तथा ॥ कुरुष्वाद्य यथाशक्ति तव कार्यं भविष्यति ॥ ४६ ॥ एतस्मादपरं किं-
चिद्व्रतं नास्ति धरातले ॥ नवरात्राभिधं वैश्य पावनं सुखदं तथा॥४७॥ज्ञानदं मोक्षदं
चैव सुखसंतानवर्द्धनम् ॥शत्रुनाशकरं कामं नवरात्रव्रतं सदा॥ ४८ ॥राज्यभ्रष्टेन रा-
मेण सीताविरहितेन च ॥किष्किंधायां व्रतं चैतत्कृतं दुःखातुरेण वै॥४९॥ प्रतप्तेनापि
रामेण सीताविरहवह्निना ॥ विधिवत्पूजिता देवी नवरात्रव्रतेन वै॥ ५० ॥ तेन प्राप्ता-
थ वैदेही कृत्वा सेतुं महार्णवे॥हत्वा मंदोदरीनाथं कुंभकर्णं महाबलम्॥५१॥मेघना-
दं सुतं हत्वा कृत्वा भूपं बिभीषणम् ॥ पश्चादयोध्यामागत्य प्राप्तं राज्यमकंटकम् ॥
॥५२॥नवरात्रव्रतस्यास्य प्रभावेन विशांवर॥सुखं भूमितले प्राप्तं रामेणामिततेजसा
॥५३॥व्यास उवाच॥ इति विप्रवचः श्रुत्वा स वैश्यस्तं द्विजं गुरुम् ॥कृत्वा जग्राह स-

॥ ७ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

न्मत्रं मायाबीजाभिधं नृप॥५४॥ जजाप परया भक्त्या नवरात्रमतंद्रितः॥ नानावि-
धोपहारैश्च पूजयामास सादरम् ॥ ५५ ॥ नव संवत्सरं चैव मायाबीजपरायणः ॥
नवमे वत्सरांते तु महाष्टम्यां महेश्वरी ॥ ५६ ॥ अर्द्धरात्रे तु संजाते प्रत्यक्षं दर्शनं
ददौ ॥ नानावरप्रदानैश्च कृतकृत्यं चकार तम्॥५७॥ इति श्रीदेवीभागवते महापुरा-
णे तृतीयस्कंधे सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ❁ ॥ ॥ ❁ ॥ ॥ ❁ ॥

॥ अथ दुर्गानवरात्रपद्धतिः ॥ गुरुं गणेशं त्रिपुरां महेश्वरीं प्रणम्य दुर्गां भवभीतिभंज-
नीम्॥करोमि दुर्गानवरात्रपद्धतिं मुदा द्विजानामखिलार्थसिद्धये ॥१॥ चैत्रे तथाऽऽ-
श्विने मासे अमावास्यायां सामग्रीं संपाद्य॥शुभे समदेशे विचित्रतोरणध्वजवितान-
विभूषितं षोडशस्तंभं षोडशहस्तपरिमितं मालादिमंडितं मनोहरं मंडपं विधाय ॥
गौरमृद्गोमयाभ्यां तद्वसुधां विलेपयेत् ॥ ततस्तन्मध्ये शुभ्रां सुसमां दृढां चतुर्हस्त-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

मितां हस्तमात्रोन्नतां वेदिकां पीठार्थं विरचय्य ॥ वेदवेदांगपारगान् श्रीदेवीतत्त्वज्ञान् दुर्गाभक्तान् दांतान् द्विजान्नव सप्त पंच त्रीनेकं वा विधिना निशायां निमंत्रयेत् ॥ ततः स्वगृहमागत्य ॥ हविष्यमेकवारं भुक्त्वा भूमौ शुद्धासने शयनं कुर्यादिति नवरात्रपूर्वदिनकृत्यम् ॥ ततः प्रतिपदि ब्राह्मे मुहूर्ते प्रबुध्यावश्यकं कृत्वा ॥ नद्यादौ स्वशाखोक्तविधिना स्नात्वा॥संध्योपासनादि नित्यकर्म कुर्यात् ॥ ततो यथाशक्ति पाद्यार्घ्यमधुपर्कपुरःसरमासनवस्त्राभरणकुंडलमुद्रिकाकमंडलुभिः सप्तशतीपाठार्थं विभवानुसारेण ब्राह्मणवरणं कुर्यात् ॥यथा॥ अद्येत्यादि अमुकगोत्रं अमुकप्रवरं अ० वेदशाखाध्यायिनं अ० देवशर्माणं एभिः पूगफलाक्षतयज्ञोपवीतदक्षिणावस्त्राभरणकमंडलुद्रव्यैर्देवीमाहात्म्योक्तसकलकामनाप्राप्तये सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भवितामनुरित्यंतं मार्कंडेयपुराणांतर्गतदेवीमाहात्म्यपठनार्थं त्वामहं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वृणे ॥ इति वृत्वा वृतोस्मीति ब्राह्मणो ब्रूयात् ॥ एवं देवीभागवतपारायणार्थं वेद-
पारायणार्थं च ब्राह्मणान्वृत्वा प्रार्थयेत् ॥ आश्विने चंडिकायज्ञे युष्माभिः प्रत्यहं
द्विजाः ॥ पारायणं प्रकर्तव्यं सावधानैः शुभाय मे ॥ इति प्रार्थ्य ॥ श्रीगणेशांबि-
कामातृकार्चनपुरःसरं वेदमंत्रैः स्वस्तिवाचनं कारयित्वा ॥ वेद्यां क्षौमवस्त्रयुतं
सिंहासनं स्थापयेत् ॥ ततस्तस्मिन् सकलाभरणभूषितां शंखचक्रगदापद्मधरां सिं-
होपरि विराजमानां दिव्यांबरधरां सौम्यां सर्वलक्षणां मनोहरामंबिकामूर्तिं अष्टाद-
शभुजांमूर्तिं वा संस्थाप्य ॥ तदभावे नवार्णमंत्रमध्यलिखितं दुर्गायंत्रं संस्थापयेत् ॥
ततो विहितकाले सिंहासनदक्षपार्श्वे सन्मुखे वा कलशस्थापनं कुर्यात् ॥ तद्यथा ॥
ॐतत्सदद्य अमुकमासे अ० पक्षे अ० तिथौ अ० वासरे अ० गोत्रः अ० शर्मा
श्रीदुर्गाप्रीतिद्वारा मम यजमानस्य वा चतुर्विधपुरुषार्थसिद्ध्ये अद्यप्रभृति नवमी-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

 पर्यंतमुपवासादिनियमोपेतः वासंत वा शारदनवरात्रविहितकलशस्थापनपूर्वकं
श्रीदुर्गापूजनात्मकव्रतं यथाशक्त्यहं करिष्ये ॥ इति संकल्प्य ॥ भूमिं प्रार्थयेत् ॥
भूरंसिभूमिरसिदितिरसिविश्वधायाविश्वंस्यभुवंनस्यधुत्रीपृथिवींयंच्छपृथिवींदृंहपृथिवीं
माहिंसीः॥१॥ इति मंत्रेण भूमिं स्पृष्ट्वा ॥ तत्र ॥ धान्यमसिधिनुहिदेवान्प्राणायत्वोदाना
यंत्वाव्यानायत्वादीर्घामनुप्रसितिमायुषेधान्देवोवंः सवितांहिरंण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेण
पाणिनाचक्षुंषेत्वामहीनाम्पयोऽसि ॥ २ ॥ इति मंत्रेण धान्यं प्रक्षिप्य ॥ तत्रैव
यवान्वाप्य ॥ तदुक्तं रुद्रयामले ॥ शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम् ॥
यवान्वै वापयेत्तत्र गोधूमैश्च समन्वितान्॥ तदुपरि॥ आजिंघ्रकुलशं मुह्यात्वांविशन्त्विन्दं
वःपुनरूर्जानिवर्तस्वसानःसुहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिः ॥ ३ ॥ इति
मंत्रेणाव्रणं गौरं दृढं सुलक्षणं स्वर्णादिनिर्मितं कलशं स्थापयेत् ॥ ततस्तस्मिन् ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वरुंणस्य योत्तंभंनमसिवरुंणस्यस्कंभुसर्जंनीस्थोवरुंणस्यऋतुसदंन्यसिवरुंणस्यऋतुसदंनमसि
वरुंणस्यऋतुसदंनुमासींद ॥ ४ ॥ इति मंत्रेण पटपूतं पवित्रं जलमापूर्य ॥
कलशे ॥ व्वसोंःपुवित्रंमसिशुतधांरुंवसोंःपुवित्रंमसिसुहस्रंधारंदेुवस्त्वांसवितापुंनातु
व्वसोंःपुवित्रेंणशुतधांरेणसुप्पुकामंधुक्षः ॥ ५ ॥ इति मंत्रेण वस्त्रं वेष्टयित्वा ॥
कलशे ॥ याःफुलिनुीर्याअंफलाऽपुष्पाश्चंपुुष्पिणींःबृहुस्पतिंप्रसूतुास्तानोंमुुंचुंत्वर्ठंहसः ॥
॥ ६ ॥ इति मंत्रेण पूगफलं प्रक्षिप्य ॥ तत्र ॥ परिंवाजंपतिंःकुविरुग्निर्हुव्यान्यंक्रमीत्
दधुद्रत्नांनिदाशुषें ॥ ७ ॥ इति मंत्रेण वज्रमौक्तिकवैडूर्यपुष्परागेन्द्रनीलपंचरत्नानि
निःक्षिपेत् ॥ हिरुण्युगुर्भःसमंवर्तुताग्रें भूतस्यंजुातःपतिरेकंआसीत् ॥ सदांधारपृथिवींद्यामुते
मांकस्मैंदेुवायंहुविषांविधेम ॥ ८ ॥ इति सुवर्णं क्षिपेत् ॥ गंधद्वारांदुंराधुर्षांनित्यपुंष्टांकुरीषि
णीम् ॥ ईश्वरींसर्वंभूतानांतामिहोंपव्हयेश्रियम् ॥ ९ ॥ इतिमंत्रेण गंधम् ॥ याओषंधीःपूर्वां

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ज्ञातादेवेभ्यंस्त्रियुगंपुरामन्नैनुबभ्रूणामुहर्ठंशुतंधामानिसप्तच ॥ १० ॥ इति मंत्रेण कुष्ठमां-
सीहरिद्राद्वयमुराशैलेयचंदनवचाचंपकमुस्तदशसर्वौषधिं कलशे निःक्षिपेत् ॥
स्योनापृथिवीनोभवान्नृक्षुरानिवेशंनीयच्छानःशर्मसुप्रथाः ॥ ११ ॥ इति मंत्रेणाश्वगजशा-
लावल्मीकसंगमह्रदराजद्वारगोकुलमृदः सप्त निःक्षिपेत् ॥ कांडात्कांडात्प्ररोहंतीपरुः
षःपरुषस्परी एवानोदूर्वेप्रतंनुसहस्रेणशतेन च ॥ १२ ॥ इति मंत्रेण दूर्वां प्रक्षिप्य ॥
अश्वत्थेवोनिषदंनंपर्णेवोवसतिष्कृतागोभाजइत्किलासथयत्सुनवंथपौरुषम् ॥ १३ ॥
इति मंत्रेणाम्राश्वत्थवटोदुंबरप्लक्षपंचपल्लवानि प्रक्षिप्य॥पवित्रेस्थोवैष्णव्यौसवितुर्वः
प्रसुवउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिःतस्यंतेपवित्रपतेपवित्रंपूतस्ययत्कामःपु
नेतच्छकेयम्॥ १४॥इति मंत्रेण पवित्रं क्षिपेत्॥ततः कलशोपरि॥पूर्णादर्विपरापतसुपूर्णा
पुनरापतंवस्नेवविक्रीणावहाइषमूर्जंठंशतक्रतो॥ १५॥इति मंत्रेण तंदुलपूर्णपात्रं संस्था-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

प्य ॥ तत्र ॥ श्रीश्चंतेलुक्ष्मीश्चुपत्न्यांवहोरात्रेपार्श्वेनक्षत्राणिरूपमुश्विनौव्यात्तम् ॥ इष्णन्निं षाणामुम्मंइषाणसर्वलोकम्मंइषाण ॥ १६ ॥ इति मंत्रेण श्रीफलं विन्यस्य ततः ॥ ॐमनोजूतिर्जुषतामाज्यंस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञठंसमिमंदधातुविश्वेदेवासऽइह मादयन्तामोः३प्रतिष्ठ ॥ १७ ॥ इति मंत्रेण प्रतिष्ठां कुर्यात् ॥ ततः कलशे गणेशवरुणावावाहयेत् ॥ ॐगणानांन्त्वागणपतिंठंहवामहेप्रियाणांत्वाप्रियपतिठंहवामहेनिधीनांत्वानिधिपतिठंहवामहेव्वसोमम ॥ आहमंजानिगर्ब्भधमात्वमंजासिगर्ब्भधम् ॥ १८ ॥ ॐतत्वांयामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहवोध्युरुशठंसमान आयुःप्रमोषीः ॥ १९ ॥ ॐ भूर्भुवः स्वः गणेश वरुण इहागच्छ इह तिष्ठ ॥ इत्यावाहनादिषोडशोपचारैः कलशे तौ पूजयेत् ॥ तत्र ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ इति तीर्था-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

न्यावाह्य ॥ कलशं प्रार्थयेत् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त
सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे
कलशं तु समाश्रिताः ॥ देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोऽसि यदा कुंभ
विधृतो विष्णुना स्वयम् ॥ त्वत्तः सर्वाणि तीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि
तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च
प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठंति सर्वेऽपि यतः
कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु मे देव
प्रसन्नो भव सर्वदा ॥ इति कलशस्थापनम् ॥ अथ स्वदक्षे पीठाग्रे समीपतश्चंदना-
क्षतपुष्पगुग्गुलधूपदीपकर्पूरादिपूजासामग्रीं संस्थाप्य कृतभूतशुद्धिमातृकान्या-

॥११॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

सनवार्णमंत्रन्यासः साधकः कलशाग्रे बिंदुत्रिकोणवृत्तचतुरस्रमंडलं कृत्वा ॥ अखं-
डमंडलाकारं विश्वं व्याप्य व्यवस्थितम् ।त्रैलोक्यं मंडितं येन मंडलं तत्सदाशिवम्
॥ १ ॥ इति संपूज्य ॥ तत्राधारं संस्थाप्य ॥ मं दशकलाव्याप्तवह्निमंडलाय नमः इति
संपूज्य तदुपरि प्रक्षालितं सुधूपितं पात्रं संस्थाप्य॥ अं द्वादशकलात्मने सूर्यमंडला-
य नमः इति संपूज्य ॥ तस्मिन् शुद्धजलमापूर्य॥क्रों गंगे च यमुने चैव गोदावरि सर-
स्वति ॥ नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ इत्यंकुशमुद्रया तीर्थमावाह्य
उं षोडशकलात्मने सोममंडलाय नमः इति संपूज्य॥ मूलेनाष्टधाभिमंत्र्य॥धेनुमुद्र-
या वमित्यमृतीकृत्य गरुडमुद्रया निर्विषीकृत्य ॥ अस्त्रेण संरक्ष्य हुमित्यवगुंठ्य
प्रणमेत् ॥ इति पात्रं संस्थाप्य ॥ तत्र ॥ समंततो विविधगीतनृत्यमंगलवाद्यघोष-
प्रमुदितमनाः कुलाचारेण कलशे श्रीदुर्गां पूजयेत् ॥ यथा ॥ घृतपुष्पांजलिः श्री-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

 दुर्गां ध्यायेत् ॥ महिषघ्नीं महादेवीं कुमारीं सिंहवाहिनीम् ॥ दानवांस्तर्जयन्तीं च
॥१२॥ सर्वकामदुघां शिवाम् ॥ध्यायामि मनसा दुर्गां नाभिमध्ये व्यवस्थिताम्॥इति ध्या-
त्वा आवाहनं कुर्यात्॥जयंती मंगला काली भद्रकाली कपालिनी॥ दुर्गा क्षमा शि-
वा धात्री स्वाहा स्वधा नमोऽस्तुते ॥ इति मंत्रमुच्चार्य ॥ आगच्छ वरदे देवि दैत्यदर्प-
निषूदिनि ॥ पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ॥ सर्वतीर्थमयं वारि सर्वदेवसम-
न्वितम् ॥ इमं घटं समागच्छ तिष्ठ देवगणैः सह ॥दुर्गे देवि समागच्छ सान्निध्यमिह
कल्पय॥बलिं पूजां गृहाणेममष्टाभिः शक्तिभिः सह॥कल्याणजननीं सत्यां कामदां
करुणाकराम् ॥ अनंतशक्तिसंपन्नां दुर्गामावाहयाम्यहम् ॥ इत्यावाहनम् ॥
दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदे शिवे ॥ आसनं मणिभूषाढ्यं गृहाण त्वं
सुरेश्वरि ॥ आसनम् ॥ कात्यायनि महादुर्गे चामुंडे शंकरप्रिये ॥ पाद्यं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

गृहाण देवेशि भद्रकालि नमोऽस्तु ते ॥ पाद्यम् ॥ जगत्पूज्ये त्रिलोकेशि सर्वदानवभंजिनि ॥ अष्टांगार्घं गृहाण त्वं देवि विश्वार्तिहारिणि ॥ अर्घ्यम् ॥ पूरितं स्वर्णपात्रे च गांगेयं निर्मलं जलम् ॥ ददाम्याचमनं तुभ्यं स्वस्ति कुरु महेश्वरि ॥ आचमनम् ॥ ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि ॥ स्नानं गृहाण देवेशि तीर्थोदकविभूषितम् ॥ स्नानम् ॥ आचमनम् ॥ वस्त्रं स्वच्छं महार्हं च पट्टसूत्रेण निर्मितम् ॥ गृहाण सुभगे देवि दुकूलं च सुरार्चिते ॥ वस्त्रयुग्मं आचमनम् ॥ सुरासुराशिरोरत्ननिघृष्टचरणांबुजे ॥ अलंकारान् गृहाण त्वं नानारत्नविभूषितान् ॥ अलंकारान् ॥ श्रीखंडागरुकस्तूरीरोचनाभिः सुसंयुतम् ॥ गृहाण गंधं देवेशि सर्वकामफलप्रदे ॥ चंदनम् ॥ सौभाग्यद्रव्यम् ॥ अक्षतानि सुधौतानि गंधस्योपरि मंगले ॥ समर्पये च शोभार्थं स्वीकुरुष्वेश्वरप्रिये ॥ अक्षतानि ॥ नानापुष्पविचित्राढ्यां पुष्पमालां सुशो-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भनाम्॥प्रयच्छामि सुपुष्पाणि गृहाण त्वं सुरेश्वरि॥ पुष्पाणि ॥ गुग्गुलं गंधसंयुक्तम-
गर्वादिसमायुतम्॥दशांगं गृह्ण धूपं तु भद्रकालि नमोऽस्तु ते ॥धूपम् ॥ सुरक्तसूत्रसद्व-
र्तीगोघृतेन च पूरितम्॥दीपं गृहाण देवेशि नमस्त्रैलोक्यसुंदरि॥दीपम् ॥ दिव्यान्नरस
संपुष्टं नानाभक्ष्यैस्तु संस्कृतम्॥चोष्यपेयसमायुक्तमन्नं देवि गृहाण मे ॥ नैवेद्यम् ॥
आचमनम् ॥ नानाफलानि दिव्यानि ऋतुदेशभवानि च ॥ पूगीफलैश्च सहितान्यंब
त्वामर्पयाम्यहम्॥फलानि॥गृहाण देवि तांबूलं कर्पूरेण सुवासितम्॥पूगीफलसमायु-
क्तं सचूर्णं मुखमंडनम् ॥ तांबूलम् ॥ श्रीफलादिविविधफलैरर्घ्यं दत्त्वा ॥ महेशि का-
लिके दुर्गे महिषासुरसूदिनि॥ नीराजनं मया दत्तं गृहाण सुरसुंदरि॥नीराजनम्॥दुर्गे
देवि नमस्तुभ्यं सकलासुरनाशिनि ॥ पुष्पांजलिं गृहाण त्वं मया दत्तं सुरार्चिते ॥ ॥१३॥
पुष्पांजलिम्॥सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके॥ शरण्ये त्र्यंबके दुर्गे कात्याय-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नि नमोऽस्तु ते ॥ नमस्कारम् ॥ मया जन्मसहस्रेषु आर्जितं पापसंचयम् ॥ तत्सर्वं नाशय क्षिप्रं प्रदक्षिणपदे पदे ॥ प्रदक्षिणाम् ॥ पूजायाः सद्गृहार्थं तु दक्षिणा दीयते मया ॥ तां गृहाण महेशानि पूजां मे सफलां कुरु ॥ दक्षिणाम् ॥ इति दुर्गां संपूज्य ॥ शक्तश्चेदावरणार्चनमंत्रावसरे कुर्यात् ॥ अथ बलिदानम् ॥ तदुक्तं रुद्रयामले ॥ पूजनोत्तरकाले तु महिषस्य च हिंसनम् ॥ खड्गेन कुर्यान्नृपतिर्देवीप्रियचिकीर्षया ॥ छागं वा मेडकं वाऽपि क्षिपयेद्भक्तितत्परः ॥ पुरुषं वा प्रतिनिधिं कूष्मांडच्छेदनं प्रभो ॥ ब्राह्मणेन तदा देयं कूष्मांडं तद्द्विजातिना ॥ श्रीफलं वा सुराधीश छेदनं नैव कारयेत् ॥ रक्तमांसैः सुराभिश्च बलिं दद्याद्द्विपाश्रितः ॥ माषान्नेन बलिर्देयो ब्राह्मणेन विजानता ॥ केचिदेतद्बलिं नैवेद्यनिवेदनावसरेऽपि कुर्वंति ॥ तं च यथोक्तविधिना यथासंप्रदायं कर्तव्यम् ॥ ततो हवनं तच्च त्रिकोणकुंडे स्थंडिले वा विधेयम् ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

तत्र विशेषो रुद्रयामले॥ततः प्रधानहोमः स्यात्त्रिमधुप्लुत उत्तमः॥ प्रधानद्रव्यमुद्दिष्टं
पायसान्नं तिलास्तथा ॥ १ ॥ यवान्नैः श्रीफलैर्दिव्यैर्नानाविधफलैस्तथा ॥ किंशुकैः
सर्षपैः पूगैर्लाजादूर्वांकुरैस्तथा ॥ २ ॥ करवीरै रक्तपुष्पै रक्तोत्पलसितैरपि ॥रक्तचं-
दनखंडैश्च गुग्गुलैश्च मनोहरैः ॥ ३ ॥ सप्तद्वीपेश्वरीं ध्यात्वा होमं कुर्यात्समाहितः ॥
चंडीपाठेन होतव्यं कृत्वा तु कवचं पुरा ॥ ४ ॥ ततश्चाप्यर्गलां चैव ततो वै कीलकं
भवेत् ॥ ततः सप्तशतीं चैव रहस्यं पल्लवं तथा ॥ ५ ॥ चंडीपाठे तथा होमे क्रम उक्तो
मनीषिभिः ॥ प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि च क्रमात् ॥ ६ ॥ नवाक्षरेण वा देव
नमो देव्या इतीति वा॥ततो वै नवदुर्गायाः प्रीतये नवकं हुनेत्॥७॥तत्र नंदा भवत्या-
द्या द्वितीया रक्तदंतिका॥शांभवीति तृतीया च दुर्गा भीमा तथा परे॥८॥भ्रामरी का- ॥१४॥
लिका चैव शिवदूती प्रजापतिः ॥ स्विष्टकृच्च ततो दुर्गे हुत्वा पूर्णाहुतिं ततः ॥९॥ गंध-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पुष्पफलोपेतैः स्रुवं कृत्वा घृतप्लुतम् ॥ मूलमंत्रेण होतव्या घृतेनाच्छिन्नधारया ॥ १० ॥
होमसंकल्पनं कुर्याच्छेषकर्म समापयेत् ॥ अभिषेकं स्वाशिरसि कारयेद्द्वाडवादिभिः ॥ ११ ॥ इति तत्र स्वयं चंदनागरुकुंकुमादिगंधलिप्तांगः सुवस्त्रमाल्यालंकृतः कृतन्यासः सरहस्यं चंडिकाचरितत्रयं मूलमंत्रजपपुरःसरं मौनी ध्यानपरायणो मंत्रार्थगतचित्तःप्रत्यहमेकैकामावृत्तिं मध्यमचरितं वा जपेत् ॥ तदुक्तं रुद्रयामले ॥
पूर्वोक्तांश्च ततो न्यासान्कृत्वा सप्तशतीं जपेत् ॥ प्रथमं चरितं प्रोक्तं मधुकैटभघातनम् ॥ १ ॥ द्वितीयं विद्धि चरितं महिषासुरघातनम् ॥ उत्तरं चरितं ज्ञेयं शुंभादिकवधान्वितम् ॥ २ ॥ चरितानि जपेत्त्रीणि सरहस्यान्यतंद्रितः ॥ चरितं मध्यमं वाऽपि जपेद्वा चंडिकामयम् ॥ ३ ॥ जपेद्वा मूलमंत्रं हि शतमष्टोत्तरं तथा ॥ नमो देव्या इति मंत्रं जपेद्वा चंडिकाप्रियमिति ॥ ४ ॥ ततः सर्वस्वरूपेत्यादिषड्भिः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

 कृतांजलिरीप्सितं प्रार्थयेत् ॥ ततो दुर्गां स्तुवीत ॥ लक्ष्मीशे योगनिद्रां प्रभजति
 भुजगाधीशतल्पे सदर्पावुत्पन्नौ दानवौ तच्छ्रवणमलमयांगौ मधुं कैटभं च ॥ दृष्ट्वा
भीतस्य धातुर्नुतिभिरभिनुतामाशु तौ नाशयंतीं दुर्गां देवीं प्रपद्ये शरणमहमशेषाप-
दुन्मूलनाय ॥१॥ युद्धे निर्जित्य दैत्यः सुरकुलमखिलं यस्तदीयेषु धिष्ण्येष्वास्थाप्य
स्वान्विधेयान्स्वयमगमदसौ शक्रतां विक्रमेण ॥ तं सामात्याप्तमित्रं महिषमभिनि-
हत्यास्य मूर्द्धाधिरूढां दुर्गां० ॥२॥ विश्वोत्पत्तिप्रणाशस्थितिविहृतिपरे देवि घोराम-
रारित्रासात्त्रातुं कुलं नः पुनरपि च महासंकटेष्वीदृशेषु ॥ आविर्भूयाः पुरस्तादिति
चरणनमत्सर्वगीर्वाणवर्गां दुर्गां० ॥ ३ ॥ हंतुं शुंभं निशुंभं त्रिदशगणनुतां हेमदोलां
हिमाद्रावारूढां व्यूढसैन्यान्युधि निहतवतीं धूम्रदृक्चंडमुंडान् ॥ चामुंडाख्यां दधा-
नामुपशमितमहारक्तबीजोपसर्गां दुर्गां० ॥ ४ ॥ ब्रह्मेशस्कंदनारायणकिटिनरसिंहैं-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

द्रशक्तीः स्वभृत्याः कृत्वा हत्वा निशुंभं जितविबुधगणं त्रासिताशेषलोकम् ॥ एकी-
भूयाथ शुंभं रणशिरसि निहत्यास्थितामात्तखड्गां दुर्गां०॥ ५ ॥त्रायस्व स्वामिनीति
त्रिभुवनजननि प्रार्थना त्वय्यपार्थां पाल्यंते प्रार्थनाभिर्भगवति शिशवः किं त्वद-
न्या जनन्यः ॥तत्तुभ्यं स्यान्नमस्येत्यवनतविबुधाल्हादिवीक्षाविसर्गां दुर्गां० ॥ ६ ॥
त्रैगुण्यानां गुणानामनुसरणरतां केलिनानावतारां त्रैलोक्यत्राणशीलां दनुजकुलव-
नीवह्निकीलां सलीलाम् ॥ देवीं सच्चिन्मयीन्तां विपुलितविनमत्सात्रिवर्गापवर्गां
दुर्गां०॥७॥सिंहारूढां त्रिनेत्रां करतलविलसच्चक्रशंखादिरम्यां भक्ताभीष्टप्रदात्रीं
त्रिभुवनजननीं सर्वलोकैकवंद्याम् ॥ सर्वालंकारदीप्तां विधुयुतमुकुटां श्यामलांगीं
कृशांगीं दुर्गां०॥८॥एतं संतः पठंतु स्तवमखिलविपज्जालतूलानलाभं हृन्मोहध्वांत-
भानुप्रतिममखिलसंकल्पकल्पद्रुकल्पम् ॥ दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमं-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

 होगजेंद्रश्रेणीपंचास्यदेश्यं विपुलभयदकालाहिताक्ष्यप्रतीपम् ॥ ९ ॥ इति दुर्गां
स्तुत्वा ॥ कुमारीपूजनं कुर्यात्॥ मंत्राक्षरमयीं लक्ष्मीं मातृकारूपधारिणीम्॥नवदु-
र्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ इतिमंत्रेण सत्कारपुरःसरं सलक्षणां
कुमारीमावाह्य ॥ कुमारिकायै नमः ॥ १ ॥ इति नाममंत्रेण पाद्यार्घ्याचमनगंधपुष्प-
धूपदीपनैवेद्यदक्षिणावस्त्राभरणैर्यथाशक्ति कुमारीं संपूज्य ॥ एवं त्रिवर्षादिदशवर्षा-
तानां कन्यकानां पूजनम्॥त्रिमूर्त्यै नमः॥२॥कल्याण्यै नमः॥३॥रोहिण्यै नमः॥४॥
कालिकायै नमः॥५॥चंडिकायै नमः॥६॥शांभव्यै नमः॥७॥दुर्गायै नमः॥८॥सुभद्रा-
यै नमः॥९॥इति नाममंत्रैः पृथक्पूरकुर्यादेवम्॥कुमारीर्ब्राह्मणांश्च विधिपूर्वकं भोजये-
त् ॥ स्वजनैः सह स्वयं भुक्त्वा यथासुखं विहरेदित्थम्॥प्रतिपदादिनवम्यंतं त्रिकालं
दुर्गार्चनं गीतवादित्रनृत्यैर्महोत्सवं च कुर्यात् ॥ देव्यग्रे पूगीफलं गृहीत्वा प्रतिपदि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

यथाशक्ति नियमान् कुर्यात् ॥ अद्यारभ्य फलाहारो जितक्रोधो जितेंद्रियः ॥ भो-
क्ष्येऽहं नवमीतिथ्यां शरणं परमेश्वरि ॥ १ ॥ असति ॥ प्रतिपत्तिथिमारभ्य यावच्च-
नवमीतिथिः ॥ नवरात्रव्रतस्यास्य फलसिद्ध्यै सुरेश्वरि ॥ १ ॥ उपोषितो ब्रह्मचारी
कामक्रोधविवर्जितः ॥ परनिंदापरद्रोहलोभमात्सर्यवर्जितः ॥ २ ॥ सत्यवाक् देवता-
भक्तो भूतेंद्रियविनिग्रहः ॥ स्नानं दानं जपं होममखंडं दीपमर्चनम् ॥ ३ ॥ करिष्ये
त्वत्प्रसादेन स्वीकुरुष्वानुकंपया ॥ मय्यनन्ये ह्यगतिके त्वदेकशरणे शिवे ॥ ४ ॥
यथोक्तफलदा भूया महालक्ष्मि दयानिधे ॥ दंतोच्छिष्टं मुखोच्छिष्टं यत्स्वप्नांतर-
दुष्कृतम् ॥ ५ ॥ तत्सर्वं क्षम्यतां देवि दासं मत्वाऽगतिं च माम् ॥ इत्यादिनि-
यमोपेतः साधकोऽष्टम्यां नवम्यां च जागरणं श्रीदुर्गार्चनं बलिदानं कुमारीपूजनं
सप्तशतीस्तवेन हवनं च विहितसमये विशेषतः कुर्यात् ॥ ततो नवम्यां नियममोचनं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

कुर्यात् ॥ देव्यग्रे पूगीफलं गृहीत्वा पठेत् ॥ देवीसंतोषणार्थाय यन्मया नियमाः
कृताः ॥ अद्य तान्मोचयिष्यामि व्रतसंपूर्तिहेतवे ॥ १ ॥ जपच्छिद्रं तपश्छिद्रं
यच्छिद्रं नियमादिषु ॥ सर्वं भवत्वच्छिद्रं विप्रदेवीप्रसादतः ॥ २ ॥ ब्राह्मणा यानि भाषं-
ते तानि मन्यंति देवताः ॥ ब्राह्मणा जंगमं तीर्थं निर्जलं सर्वकामिकम् ॥ ३ ॥ तेषां
वाक्योदकेनैव शुद्ध्यंति मलिना जनाः ॥ काले वाप्यथ वाऽकाले श्रद्धयाश्रद्धया
मया ॥ ४ ॥ कृतं पूजादिकं सर्वं सत्कृतं भवतु प्रभो ॥ इति नियमान् विसृज्य
दशम्यामुत्तरपूजनं कृत्वा ॥ नमो देव्या इत्यादिषड्भिर्मंत्रैर्नत्वा ॥ उत्तिष्ठ ब्रह्मणस्पते०
॥ उत्तिष्ठोत्तिष्ठ देवेशि नवदुर्गेंबिके शिवे ॥ महालक्ष्मि गणैः सार्द्धं सदा तिष्ठ मम
गृहे ॥ १ ॥ गच्छ गच्छ सुरश्रेष्ठे स्वस्थाने परमेश्वरि ॥ यत्र ब्रह्मादयो देवा न विदुः
परमं पदम् ॥ यत्र ब्रह्मादयो देवा तिष्ठंति हृदये मम ॥ सुखी स्यां त्वत्प्रसादेन तथा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वस मम गृहे ॥ इति विसर्जनम् ॥ ततः कलशजलैरभिषेकं कारयेत् ॥ तत्र वेदमंत्राः
स्वस्वशाखोक्ताः तंत्रमंत्रास्तु ॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो
जगन्नाथस्तथा संकर्षणो विभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते ॥
आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा
शिवः ॥ब्रह्मानंतेन सहिता दिक्पालाः पांतु त्वां सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा
पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुःशांतिः कांतिस्तुष्टिश्च मातरः ॥ ४ ॥
एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ॥ आदित्यश्चंद्रमा भौमो बुधो जीवः
सितोऽर्कजः ॥ ५ ॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः ॥ देवदानवगंधर्वा
यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मुनयो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा
नागा दैत्याश्चाप्सरसां गणाः ॥७॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि
जलदा नदाः ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॥ ९ ॥ इति ब्राह्मणेभ्योऽभि-
षेकं कारयित्वा ॥ विप्रहस्ते पूगफलं दत्त्वा पाठयेत् ॥ मया तव नियोगेन कृतं यच्च
जपादिकम् ॥ तज्जं श्रेयस्तु तत्तुभ्यमहं संप्रददेऽधुना ॥ १ ॥ इति श्रेयः संपाद्य ॥
वित्तशाठ्यविवर्जितो ब्राह्मणेभ्यः स्वर्णादिदक्षिणां दद्यात् ॥ प्रसन्नचित्तेभ्यो द्विजेभ्यो
विविधाशीर्गृहीत्वा ॥ स्वेष्टमित्रबंधुभिः सह श्रीदुर्गाप्रसादं स्वीकुर्यात् इति ॥ भार-
द्वाजकुलोत्पन्नचतुर्वेदिद्विजेन च ॥ रामचंद्रतनूजेन नाथूनारायणेन च ॥ १ ॥ द्विपंच-
नंदभूवर्षे चैत्रमासे सिते दले ॥ नवम्यां भृगुवारे च पूर्वाषाढे च शोभने ॥ २ ॥ साधकानां
हितार्थाय देवीभागवतादियम् ॥ नवरात्रस्य रचिता श्रीदुर्गार्चनपद्धतिः ॥ ३ ॥
इति दुर्गानवरात्रपद्धतिः संपूर्णा ॥ श्रीः ॥ अथ बलिदानप्रयोगः ॥ साधको मृगचर्मा-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

द्यासने स्वास्तिकासनेनोदङ्मुख उपविश्य ॥ आचम्य ॥ प्राणानायम्य॥ बद्धशिखो धृतभस्मरुद्राक्षो मातृकान्यासं मूलन्यासं विधाय ॥ देवीं ध्यात्वोपचारैः संपूज्य ॥ मूलमष्टोत्तरशतं जपित्वा देव्यै समर्प्य पात्रं संस्थाप्य ॥ बलिदानायाज्ञां प्रार्थयेत् ॥ चराचराणां जननि सकलानंददायिनि ॥ बलिदानाय देवेशि ममाज्ञां दातुमर्हसि ॥ १ ॥ इत्याज्ञां प्रार्थ्य ॥ संकल्पं कुर्यात् ॥ ॐतत्सदद्येत्यादि संकीर्त्य मम यजमानस्य वा सकलपापक्षयपूर्वकमानसेप्सितफलसिद्ध्ये दुर्गाप्रीत्यर्थं तंत्रोक्तविधानेन अमुकपशोर्बलिदानमहं करिष्ये ॥ इति संकल्प्य ॥ मूलेन बलिं स्नापयित्वा देव्यग्रे पूर्वदिङ्मुखबलिं सामान्यार्घोदकेन प्रोक्ष्य ॥ रक्तचंदनसिंदूराक्षतरक्तमाल्यादिभिः ॥ ॐऐंह्रींश्रींसर्वदेवतास्वरूपिणे बलिरूपाय अमुकपशवे नमः ॥ इति मंत्रेण संपूज्य॥ तं फडिति संरक्ष्य हुमित्यवगुंठ्य वं इति धेनुमुद्रयाऽमृतीकृत्य ॥ बलेरंगेषु

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

देवताः पूजयेत् ॥ ब्रह्मरंध्रे ॥ ॐब्रह्मणे नमः ॥१॥ नासायां ॥ ॐमेदिन्यै नमः ॥ २ ॥
कर्णयोः ॥ ॐआकाशाय नमः ॥ ३ ॥ जिव्हायां ॥ ॐसर्वतोमुखाय नमः ॥ ४॥
नेत्रयोः ॥ ॐज्योतिर्भ्यो नमः ॥५॥ वदने ॥ ॐविष्णवे नमः ॥६॥ ललाटे ॥ ॐचंद्रा-
य नमः ॥ ७ ॥ दक्षगण्डे ॥ ॐशक्राय नमः ॥८॥ वामगण्डे ॥ ॐवह्नये नमः ॥ ९॥
ग्रीवायाम् ॥ ॐसमवर्तिने नमः ॥१०॥ रोमकूपेषु ॥ ॐधृत्यै नमः ॥११॥ भ्रूमध्ये ॥
ॐप्रचेतसे नमः ॥१२॥ नासामूले ॥ ॐश्वसनाय नमः ॥१३॥ स्कंधे ॥ ॐमहेश्वरा-
य नमः ॥ १४ ॥ हृदये ॥ ॐसर्वराजेंद्राय नमः ॥१५॥ इति संपूज्य॥ तद्दक्षकर्णे ॥
पशुगायत्रीं पठेत् ॥ॐपशुपाशाय विद्महे शिरश्छेदाय धीमहि । तन्नो जीवः प्रचो-
दयात् ॥ ॐह्रींहूंफट् शिवस्वरूपं गच्छ स्वाहा॥ ॐजुंसः हसक्षमलवरयूं शिवस्वरूपं
गच्छ स्वाहा ॥ इति गायत्रीं मंत्रांश्च त्रिः प्रजप्य॥ ॐमहातपोभिर्दानैश्च यज्ञैर्यत्सा-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ध्यते नरैः॥ तन्मे देहि महाभाग सत्वरं चाग्रहि श्रियम् ॥ इति मंत्रेण पुष्पांजलिं बलि-
शिरसि दत्त्वा॥ बलिमस्तकं धृत्वा पठेत् ॥ ॐ यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयं-
भुवा॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः॥ शिवायत्तमिदं पिंडमतस्त्वं
शिवतां गतः॥उद्बुध्यस्व पशो त्वं हि नाशिवस्त्वं शिवोऽसि हि॥ पशो त्वं जीवरूपेण
मम भाग्यादुपस्थित ॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशक ॥ इति मंत्रैः पशुं
संबोध्य॥ पुरतः खड्गं संस्थाप्य पूजयेत् ॥ ॐ ह्रीं कालि कालि वज्रेश्वरि लोहदंडायै
नमः इति संपूज्य॥ ॐ ह्रीं ब्रह्मवागीश्वरीभ्यां नमः॥ मुष्टिमूले ॐ ह्रीं लक्ष्मीनारायणा-
भ्यां नमः ॥ मध्ये ॥ ॐ उमामहेश्वराभ्यां नमः ॥ खड्गाग्रे॥ इति खड्गं संपूज्य ध्या-
येत् ॥ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम् ॥ उग्रं रक्तास्यनयनं रक्तमा-
ल्यानुलेपनम् ॥ रक्तांबरधरं चैव पाशहस्तं कुटुंबिनम्॥ पिबमानं च रुधिरं भुंजानं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

क्रव्यसंचयम् ॥ रसना त्वं चंडिकायाः सुरलोकप्रसादक॥असिर्विशसनः खड्गस्ती-
क्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते॥ खड्ग त्वं शिवरू-
पोऽसि क्रोधभैरवसंज्ञकः ॥ दुर्गाप्रीतिकरो नित्यं कालिशक्तिरिवापरा ॥ खड्गाय
खलनाशाय शक्तिकार्यार्थतत्परा॥ पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ नमोऽस्तु ते ॥
इति ध्यात्वा ॥ कुशाक्षतजलान्यादाय ॥ संकल्पं कुर्यात् ॥ ॐतत्सदद्येत्यादिक-
मुच्चार्य्य ॥ अमुकगोत्रो अमुकशर्मा दीर्घायुर्बलविपुलधनराज्यसंपत्तिकामो दुर्भि-
क्षदुःखदारिद्र्यसर्वारिष्टनिवृत्तिपूर्वकाश्वमेधसहस्रसमफलप्राप्तिकामोऽनेकध्वज-
मालालंकृतविमानारोहणपूर्वकाखंडसुखाप्तये श्रीदुर्गाप्रीत्यर्थं अमुकपशुं घातयि-
ष्ये इति संकल्प्य ॥ तज्जलं पशुशिरसि निःक्षिपेत् ॥ ततः मूलं आंहूंह्रींफट्छिंधि
छिंधि स्वाहा इति मंत्रमुच्चरन्पूर्वाभिमुखः पशुमुखे सैंधवं दत्त्वा तमुदङ्मुखं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

संस्थाप्य ॥ एकप्रहारेण छिंद्यात् ॥ सविकल्पश्चेत्परहस्तेन छेदनं कारयित्वा ॥
बलिरुधिरं पूगसैंधववारिमधुगंधाक्षतपुष्पयुतं पात्रे समादाय देवीवामे निवेदयेत् ॥
ॐ ऐंह्रींश्रींकौशिकी रुधिरेणाप्यायताम् ॥ इति मंत्रेण निवेद्य ॥ ततो देव्यग्रे ॥
ॐ ऐंह्रींश्रींकौशिकी शिरसाऽऽप्यायताम् ॥ इति मंत्रेण ज्वलद्वर्तियुतं मुंडं निवेद्य ॥
अमृतोपस्तरणमसि स्वाहेत्यापोशानं दत्त्वा ॥ मूलं प्रजप्य ॥ देवीं तृप्तां विभाव्य ॥
अमृतापिधानमसि स्वाहेत्युत्तरापोशनं दत्त्वा ॥ तांबूलं दक्षिणां च निवेद्य ॥ ततो
नीराजनं पुष्पांजलिं च कृत्वा ॥ मूलं ऋष्यादिपूर्वकं यथाशक्ति प्रजप्य ॥ योनिमु-
द्रया प्रणमेत् ॥ इति बलिदानप्रयोगः ॥ ॥ ॥ ॥

इदं पुस्तकं श्रीकृष्णदासात्मज-गंगाविष्णुना स्वकीये लक्ष्मीवेङ्कटेश्वर
मुद्रणालयेऽङ्कितम् । कल्याण-मुम्बई । सं० १९६६ शके १८२०

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पुराणइतिहासग्रन्था: ।

हरिवंश भा० टी० ग्लेज १०रु०। रफ् ९ रु०
केवल भाषा वार्तिक ग्लेज ५ रु०। रफ् ४ रु०
भागवत दशमस्कन्ध भाषाटीका दृष्टांतसह ४—०
विष्णुपुराणसटीक अति उत्तम... ... ४—०
रामाश्वमेध भा० टी० सहित मोटे कागजका ४—०
कालिकापुराणशाक्तजनोंको अवश्य ग्राह्य ... ४—०
रामाश्वमेध अक्षर बडा मूल ... ... २—८
रामाश्वमेध अक्षर बडा मूल रफ् ... २—०
सुन्दरकाण्ड भूषणादि टीकात्रय समेत ... ३—०
निरुक्ति निर्वचन दो व्याख्याओंसे युक्त

भगवद्गुणदर्पणाख्यविष्णुसहस्रनाम
भाष्य ट. म. माफ. मूल्य. ... ... ५—०
पुरुषोत्तममाहात्म्य ... ... ०—१२
हरितालिका भाषाटीका ... ... ०—३
हरितालिकाकथा संस्कृत .... ०—२
ऋषिपञ्चमी भा० टी० .... ०—३
संकष्टचतुर्थीव्रतकथा .... ०—४
सत्यनारायणकथा भाषाटीका .... ०—४
सत्यनारायणकथा अध्याय ७ का
मूल बडा अक्षर ... ... ०—३

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

सत्यनारायणकथा मूल	०–२	एकादशीमाहात्म्य भाषाटीका सह ...	१–०
अनन्तकथा मूल	०–२	भागवतमाहात्म्य भाषाटीका	०–६
" " भाषाटीका	०–४	माघमहात्म्य	०–८
मूलरामायण मूल	०–२	बदरीनारायणमाहात्म्य	०–७
मूलरामायण भूषण भाषानुवाद ...	०–८	द्वारकामाहात्म्य	०–५
अद्भुतरामायण	०–१२	बदरीनारायण यात्राप्रकाश भाषा० ...	०–४
अध्यात्मरामायण भाषाटीका ...	४–०	मायापुरीमाहात्म्य (गंगा म०) ...	०–१२
देवीभागवतसटीक	७–०	भागवतमाहात्म्य सटीक संस्कृत ...	१–०
फाल्गुनमाहात्म्य	०–८	श्रीकृष्णजन्मखण्ड	३–०

पुस्तकें मिलनेका ठिकाना– गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण–मुंबई.

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ इति समंत्रनवरात्रपद्धतिः सोद्धारा कथासहिता समा० ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri